# Ramakrishna Stavaraja

# રામકૃષ્ણસ્તવરાજઃ

## Document Information

Text title : Ramakrishna Stavaraja

File name : rAmakRRiShNastavarAjaH.itx

Category : deities_misc, gurudev, rAmakRiShNa, stavarAja

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 13, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2023

*sanskritdocuments.org*

# રામકૃષ્ણસ્તવરાજઃ

ઓઙ્કારવેદ્યઃ પુરુષઃ પુરાણો
    બુદ્ધેશ્ચ સાક્ષી નિખિલસ્ય જન્તોઃ ।
યો વેત્તિ સર્વં ન ચ યસ્ય વેત્તા
    પરાત્મરૂપો ભુવિ રામકૃષ્ણઃ ॥ ૧॥

ન વેદગમ્યો ન ચ યોગગમ્યો
    ધ્યાનૈર્ન જાપૈર્ન તપોઽભિરુગ્રૈઃ ।
જ્ઞેયઃ કદાપીહ તતોઽવતીર્ણો
    દયાનિધે ત્વં ભુવિ રામકૃષ્ણઃ ॥ ૨॥

મોક્ષસ્વરૂપં તવ ધામ નિત્યં
    યથા તદાપ્નોતિ વિશુદ્ધચિત્તઃ ।
તથોપદેષ્ટાખિલતત્ત્વવેત્તા
    ત્વં વિશ્વધાતા ભુવિ રામકૃષ્ણઃ ॥ ૩॥

ભક્તેસ્તથા શુદ્ધજ્ઞાનસ્ય માર્ગૌ
    પ્રદર્શિતૌ દ્વૌ ભવમુક્તિહેતુ ।
તયોર્ગતાનાં ધ્રુવનાયકોઽસિ
    ત્વં મોક્ષસેતુર્ભુવિ રામકૃષ્ણઃ ॥ ૪॥

ગતિસ્ત્વમેકા જગતાં જડાનાં
    પુરા વિસૃષ્ટેશ્ચિદખણ્ડરૂપઃ ।
તદ્વલ્લયે સ્યા અધુનાસિ તદ્વત્
    ત્વમાદિદેવો ભુવિ રામકૃષ્ણઃ ॥ ૫॥

વર્ણાશ્રમાચારવિહીનશાન્તાઃ
    સંન્યાસિનો જ્ઞાનવિધૂતચિત્તાઃ ।
ધ્યાયન્તિ યં નિત્યમભેદદૃષ્ટ્યા
    સ એવ હિ ત્વં ભુવિ રામકૃષ્ણઃ ॥ ૬॥

તેજોમયં દર્શયસિ સ્વરૂપં
    કોષાન્તરસ્થં પરમાર્થતત્ત્વમ્ ।
સંસ્પર્શમાત્રેણ નૃણાં સમાધિ
    વિધાય સદ્યો ભુવિ રામકૃષ્ણઃ ॥ ૭॥

રાગાદિશૂન્યાં તવ સૌમ્યમૂર્તિ
    દૃષ્ટ્વા પુનશ્ચાત્ર ન જન્મભાજઃ ।
સ્થાને યદાદાય વિશુદ્ધસત્ત્વ-
    મિહાવતીર્ણો ભુવિ રામકૃષ્ણઃ ॥ ૮॥

મહાવિચિત્રં મહદાદિકાર્યં
    લબ્ધ્વાપ્યધિષ્ઠાનમનાદ્યનન્તમ્ ।
કરોતિ નિત્યા પ્રકૃતિસ્તવાદ્યા
    તદ્બ્રહ્મ સચ્ચિદ્ ભુવિ રામકૃષ્ણઃ ॥ ૯॥

કૃશાનુવત્તાપવિદગ્ધચિત્તાઃ
    સંસારિણઃ શાન્તિનિકેતનં ત્વામ્ ।
સમ્પ્રાપ્ય શાન્તા હિ ભવન્તિ તેષાં
    ત્વં શાન્તિદાતા ભુવિ રામકૃષ્ણઃ ॥ ૧૦॥

ષડઙ્ગયોગો ન યતઃ સુસાધ્યો
    જ્ઞાનાધિકારી સુલભો ન યસ્માત્ ।
ગરીયસી ભક્તિરતઃ કલૌ સ્યાત્
    તજ્જ્ઞાપકસ્ત્વં ભુવિ રામકૃષ્ણઃ ॥ ૧૧॥

નાકાદિલોકં સુખદં ચ દિવ્યં
    સુરમ્યમૈશ્વર્યમહં ન યાચે ।
હૃદાસને ત્વં કૃપયા સદા વૈ
    વસેતિ યાચે ભુવિ રામકૃષ્ણઃ ॥ ૧૨॥

યં બ્રહ્મવિષ્ણુ ગિરિશશ્ચ દેવા
    ધ્યાયન્તિ ગાયન્તિ નમન્તિ નિત્યમ્ ।
તૈઃ પ્રાર્થિતસ્તસ્ય પરાવતારો
    દ્વિબાહુધારી ભુવિ રામકૃષ્ણઃ ॥ ૧૩॥

વન્દે જગદ્બીજમખણ્ડમેકં

વન્દે સુરૈઃ સેવિતપાદપીઠમ્ ।
વન્દે ભવેશં ભવરોગવૈદ્યં
તમેવ વન્દે ભુવિ રામકૃષ્ણમ્ ॥ ૧૪॥

રામકૃષ્ણં ચિદાનન્દં યઃ સ્તૌતિ ભક્તિમાન્સદા ।
તસ્ય ચિત્તં ભવેચ્છુદ્ધં તત્ત્વજ્ઞાનં સ્વયં તતઃ ॥ ૧૫॥

ઇતિ રામકૃષ્ણસ્તવરાજઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

*Ramakrishna Stavaraja*

pdf was typeset on June 13, 2023

Please send corrections to *sanskrit@cheerful.com*